त्याच्चिंशांशमाहरेत् । द्विगुणं तु तृतीयेऽह्नि परतः क्रेतुरेव तदिति" । परतः तृतीयाह्नात् परतः क्रेतुरेव तत् क्रीत्वा अनुशयादिकं न कुर्य्यादित्यर्थः । यत्तु मनुवचनम् "क्रीत्वा विक्रीय वा किञ्चिद्यस्येहानुशयो भवेत् । सोऽन्तर्दशाहात्तद्द्रव्यं दद्याच्चैवाददीत वेति" तदुपभोगे नश्वरस्त्वल्पकृयानशयनादिविषयम् । यत्तू पभोगेन विकारप्रापितं सदोषमपि तत् परीक्षाकालमध्येऽपि न प्रतिदेयमित्याह नारदः "परिभुक्तन्तु यद्वासः क्लिष्टरूपं मलीमसम् । सदोषमपि तत् क्रीतं विक्रेतुर्न भवेत्पुनरिति" । वासोग्रहणमुपलक्षणमिति मदनरत्ने । वासोविषयतैवास्येति माधवीये । पण्यानां देशकाले उपचयापचयौ ज्ञातव्यावित्याह नारदः "क्षयं वृद्धिञ्च जानीयात्पण्यानामागमन्तथेति" । अश्वादिपण्यानामस्मिन् कालेऽस्मिन्देशे च क्षयं वृद्धिं वा जानीयात्तथागमं कुलीनत्वादिज्ञानार्थम् उत्पादकजन्मभूम्यादिकञ्च जानीयादित्यर्थः । क्रयकाले मूल्यक्षयवृद्धिदोषदर्शनमन्तरेण क्रीतविक्रीतयोः प्रत्यर्पणे पुनर्ग्रहणे दण्डमाह याज्ञवल्क्यः "वृद्धिं क्षयं वा वणिजा पण्यानामविजानता । क्रीत्वा नानुशयः कार्य्यः कुर्वन् षड्भागदण्डभागिति" । वृद्धिं मूल्यवृद्धिम् अविजानता क्रेत्रा एवं मूल्यक्षयमविजानता विक्रेत्रेत्यर्थः । परीक्षाकालातिक्रमेण प्रत्यर्पणे दण्डमाह मनुः "परेण तु दशाहस्य न दद्यान्नापि दापयेत् । आददानो ददच्चैव राज्ञा दण्ड्यः शतानि षडिति" । दशाहग्रहणं परीक्षाकालस्य पूर्व्वोक्तस्योपलक्षणम् । सर्व्वमेतत्परिभाषणाद्दते परिभाषणे तु तदनुसारेणैव प्रतिदानं तदभावादिकं मन्तव्यम्" । क्रयानुशयोऽप्यत्र ।

**क्रुञ्च्** पुंस्त्री० क्रुन्च–क्विन् "दृष्टिगत्यादि०"पा०नि० नलोपाभावः(कोँ।चवक)१वकभेदे अमरः स्त्रियां टाप् । २हंसे च "अद्भ्यः चीरं व्यापिवत् क्रुङ्ङाङ्गिरसोधिया । ऋतेन सत्यमिन्द्रियम्"यजु०१६।७२ "आङ्गिरसः अङ्गानां रसः प्राणोयथा क्रुङ् हंसोभूत्वा धिया प्रज्ञया अद्भ्यः सकाशात् चीरं दुग्धमपिवत् पिबति संसृष्टाभ्यां चीरोदकाभ्यां चीरमेव हंसः पिबतीति जातिस्वभावः" वेददी० ।

**क्रुञ्च** पुंस्त्री० क्रुन्च–अच् । (कोँ।चवक) वकभेदे अमरः "वायवे बलाका इन्द्राग्निभ्यां क्रुञ्चान्" यजु० २४।२२ "कलविङ्को लोहिताहिः पुष्करसादस्ते त्वाष्ट्रा, वाचे क्रुञ्चः" यजु० २४।३१ स्त्रियां संयोगोपधत्वात् टाप् । पुंयोगे तु अजा०टाप् । टावन्तः। २वीणाभेदे स्त्री शब्दरत्ना० । ततः चतुरर्थ्यां नडादि० छ कुक्चागमश्च । क्रुञ्चकीय तत्सन्निकृष्टदेशादौ । क्रुञ्चा वीणाऽस्त्यस्य क्रुञ्चा वक्री अस्त्यत्र वा मतुप् यवादि० न मस्य वः । क्रुञ्चामत् तद्युक्ते त्रि० ३क्रौञ्चपर्व्वते पु० हेमच० । स्वार्थे अण् । क्रौञ्च स्वनामख्याते पर्व्वते क्रौञ्चदारणः। वकभेदे च"ददर्श भगवांस्तत्र क्रौञ्चयोश्चारुदर्शनम्" "यत् क्रौञ्चमिथुनादेकमवधीः काममोहितम्" रामा० आ० २स० । स्त्रियां तु अणन्तत्वात् ङीप् । "निशम्य रुदतीं क्रौञ्चीमिदं वचनमब्रवीत्" रामा० आ० २स०

**क्रुड** निमज्जने घनीभावे च तु० कुटा० प० अक० सेट् । क्रुडति अक्रुडीत चुक्रोड–क्रोडुः ।

**क्रुथ** हिंसने क्या० प० सक० सेट् चान्द्राः। क्रुथ्नाति अक्रोथीत् चुक्रोथ । क्रोथः ।

**क्रुध** कोपे दिवा० पर० अक० सोपसर्गः सक० अनिट् । क्रुध्यति सत्यमभिक्रुध्यति लृदित् अक्रुधत् । चुक्रोध-क्रोद्धा क्रोत्स्यति । क्रोद्धव्यम् क्रोध्यम् क्रोधनीयम् क्रोद्धा क्रोधी क्रुद्धः । क्रुध्यन् क्रोधः। क्रुद्ध्वा संक्रुध्य" "चुक्रोध पुरुषादकः" भा० आ०१५३अ० "द्रुमेभ्यः क्रुध्यमानास्ते तपोदीपितमन्यवः" भाग०६,४,५, अत्र तङ् आर्षः शक्त्रादौ चानश् वा।"क्रुध्यन् कुलं धक्ष्यति विप्रवह्निः"भट्टिः"क्रोधं विभो ! संहर संहरेति" कुमा० । "क्रुधद्रुहेर्ष्यासूयार्थानां यं प्रति कोपः" पा० कोपविषयस्य संप्रदानता । अरये क्रुध्यति ।"क्रुधद्रुहोरुपसृष्टयोः कर्म्म"पा० सोपसर्गस्य तस्य सम्प्रदानस्य कर्म्मता "क्रुध्यन्तं न प्रतिक्रुध्येत्' मनुः। "स्त्यमभिक्रुध्यति"सि० कौ०

अन्याद्युपसर्गात् परस्तु तत्तदुपसर्गद्योत्यार्थयुक्तकोपे सक० प्रति+वैपरीत्येन कोपने सक०"क्रुध्यन्तं न प्रतिक्रुध्येत्"मनुः

**क्रुध्** स्त्री क्रुध–सम्प० भावे क्विप् । कोपे कामव्याघातहेतुके चित्तवृत्तिभेदे अमरः "इतिक्रुधाऽऽक्रुश्यत तेन केतकम्" नैष० । हलन्तत्वात् वा टाप् क्रुधा

**क्रुधमिन्** त्रि०क्रुध–बा० मिनि किच्च । क्रोधयुक्ते "शुभ्रो वः शुष्मः क्रुधमी मनांसि" ऋ० ७।५६।८

**क्रुन्च(ञ्च)** कौटिल्ये, अल्पीभावे च अक०पर०सेट् । क्रुञ्चति अक्रुञ्चीत् चुक्रोञ्च । क्रुङ्‌ः क्विन् क्रुङ् अत्र "चोः कुः" पा० चवर्गान्तत्वेन कुत्वप्राप्तौ दृष्टिगत्यादिना क्विनं विधाय "क्विन् प्रत्ययस्य कुः"पा० क्विनन्तस्य पृथक् कुत्वविधानात् संयोगान्तलोपात् प्राक् कुः। भावे कुच्यते अक्रुञ्चि । केचित् दृष्टगादिस्थले क्रुञ्चामिति निर्द्दिशन्त क्रुञ्चेति ओ-